# प्राक्कथनम्

वटोदरीयसंस्कृतमहाविद्यालये (तदानींतन राजकीयसंस्कृतपाठशालायां) व्याकरणशास्त्रे अलङ्कारपदवीं, आयुर्वेदाचार्यपदवीं चाधिगत्य वटोदर - आयुर्वेद महाविद्यालये प्राध्यापकत्वेनाऽन्ते च प्राचार्यत्वेन निवृत्तानां पूजनीयचरणानां मम पितृवर्याणामाशीर्भिः, सन्ततसूचनैः ज्ञानदानक्षमोपदेशैश्च सम्प्रेरितोऽहं यदा १९७२ तः १९७७ पर्यन्तं व्याकरणविशारदकक्षायामध्ययन-मकरवं तदा डॉक्टरेत्युपाधिधारिभिः श्रीमद्भिः पाठकोपाह्वैः रामकृष्णतनूजैः श्रीजयनारायणमहादयैः पाणिनीयव्याकरणस्य सर्वोत्तमता नैकशो दर्शिताः ।

तदनन्तरं तानेव संस्कारान् १९७७ तः १९७९ पर्यन्तं व्याकरणशास्त्रिकक्षायां तेषामेव गुरुचरणानां तथा च विद्वन्मूर्धन्यानां व्याकरणवारिधीनां श्रीमतां शुक्लोपाह्वानां श्रीगौरीशङ्करात्मजानांश्रीलक्ष्मीशङ्करमहोदयानां चरणकमलेऽपि, तथा च १९८५ तः १९८७ पर्यन्तं व्याकरणाचार्यकक्षायामपि तेषामेव गुरुचरणानां पादारविन्देषु पाणिनीयव्याकरणस्याऽऽमूलचूलमध्ययनं कुर्वता मया, पराजेरसोढः (पा. सू. १-४-२६) इति सूत्रारव्याने, अध्ययनात् पराजयते इत्युक्तदिशा पराजयोनाऽनुभूतः । अपि तु पाणिनीयव्याकरणस्य वैज्ञानिकदृष्ट्या अध्ययनं कृत्वा पाणिनेरुत्तरवर्तिवैयाकरणानामुपरि केन रूपेण, केन प्रकारेण, कीदृशश्च प्रभावो वर्तत इत्यनेकशो जिज्ञासा मनसि समुदभवत् । अतस्तदर्थं मदीया वरणीयदृष्टिर्महामहोपाध्यायानां श्रीमतां प्रो. डॉ. श्री अरुणोदयजानीमहाभागानां नाम्नि कार्ये वैशारद्ये विद्वत्तायां च सम्पतिता । किन्तु प्रो. डॉ. श्रीअरुणोदयजानीमहाभागाः निवृत्तेरानन्दमनुभवन्ति स्म । निवृत्तप्राध्यापकानां च वाचस्पत्युपाध्यर्थं विश्वविद्यालयनियमानुसारेण अधिकारो नास्ति । ततः एकदा चर्चायां मम सुहृद्वर्या इदानींतन-प्राध्यापकवरिष्ठाः साहित्यव्याकरणकूलङ्कषाः श्रीमन्तः उदयन . ह. शुक्लमहाभागाः, तथा च मम परममित्रवर्याःश्रीमन्तः अश्विनभाईपाठकमहोदयाः मां कथितवन्तः - अरे ! संस्कृतविभागे डॉ. जयदेवजानीमहोदयाः व्याकरणशास्त्रेऽधीतिन एव इति ।

तत्पश्चादश्विनभाई - पाठकसमेतोऽहं डॉ. जयदेवजानीमहोदयान् निवेदितवान् । मम शास्त्रज्ञानं, पठितपाठ्यक्रमं, जिज्ञासानुरूपं विषयं विचार्य तैः जयदेवजानीमहाभागैः सपद्येव गदितं - पाणिनीय-व्याकरणस्य उत्तरवर्तिषु व्याकरणेषु सारस्वतव्याकरणमधिकप्रचारप्रसारयुक्तं च वर्तते । तत्र

सारस्वतव्याकरणपरम्परायां महोपाध्याय -श्रीविनयसागरसूरिमहोदयानां भोजव्याकरणमतीव गुणग्राहि संशोधनक्षेत्रशोधक्षमं च वर्तते, यत्र पाणिनेनैका उल्लेखाः प्राप्यन्ते इति ।

मया तत्क्षणमेव डॉ. जयदेवजानीमहाभागानां मार्गदर्शकत्वं स्वीकृतं कार्यं चारब्धम्। कदाचित् पिपीलिकागत्या कदाचिच्च पवनगत्या मदीयं संशोधनकार्यं निरन्तरं प्राचलत् । जून १९९३ पर्यन्तमधिकांशं संशोधनकार्यं सम्पादितमावाभ्याम्। किन्तु अक्तूबर १९९३ तः डॉ. जयदेवजानी-महाभागाः स्विसीयसर्वकारैर्ज्युरिचविश्वविद्यालयस्य इण्डोलोजी-विभागे तत्रत्यसंशोधनकार्ये साहाय्यं कर्तुं निमन्त्रिताः, वर्षद्वयम्। तस्मिन् समयावधौ अपि षण्मासान् यावत् मदीयं संशोधनकार्यं सम्यक् प्राचलत् । किन्तु एप्रिल १९९४ तः आरभ्य कौटुम्बिकीनां, सामाजिकीनां, महाविद्यालयस्य च सेवाकीयसमस्यानां प्रादुर्भावेन संशोधनकार्यस्य मार्गे निरन्तरं नैके अवरोधाः समुपस्थिताः। एतादृशेषु विविधावरोधेषु विभिन्नसमस्यासु विघ्नबाहुल्येष्वपि कच्छपगत्या गमनेन अद्याधुना मम संशोधनकार्यं पूर्णतायाः उषसं द्रष्टुं पारितमभवत् ।

## पाणिनीयभोजव्याकरणयोः तुलनात्मकमध्ययनम् -

इत्यस्मिन् संशोधननिबन्धे अधोलिखित रीत्या कार्यं सम्पादितम्।

**(१) प्रथमे –** भगवत: पाणिने : व्यक्तित्वं कर्तृत्वं च-इति अध्याये पाणिनीयपरम्परायाः संक्षिप्तं निरूपणम्, अल्पाक्षरेत्यादीनां, संज्ञापरिभाषेत्यादीनां चावश्यकपरिभाषितशब्दानां विवेचनं प्रतिपादितम्।

**(२) द्वितीये** – सारस्वतव्याकरणस्य रचयितु : व्यक्तित्वं कर्तृत्वं च - इति अध्याये सारस्वतसूत्रकारस्य श्रीमतोऽनुभूतिस्वरूपाचार्यस्य व्यक्तित्वं, सारस्वत - व्याकरणग्रन्थस्य विहङ्गावलोकनं प्रस्तुतम्। यत: प्रस्तुतशोधनिबन्धस्यादर्शरुपं भोजव्याकरणं सारस्वतव्याकरणपरम्परां स्वीकरोति।

**(३) तृतीये** – महोपाध्याय-श्रीविनयसागरसूरीणां व्यक्तित्वं कर्तृत्वं च-इति अध्याये सारस्वतव्याकरणपरम्परान्तर्वर्तिनो भोजव्याकरणग्रन्थस्य रचयितृणां विक्रमस्य षोडशशतके कच्छजनपदस्य महाराजस्य भोजमल्लस्य संस्कृताध्ययनापेक्षां पूरयितुं तस्यैव कच्छमहाराजस्य भोजमल्लस्य नाम्ना उट्टङ्कितो ग्रन्थो भोजव्याकरणम् । एतेषां महोपाध्याय श्रीविनयसागरसूरीणां व्यक्तित्वविषयका: कर्तृत्वविषयकाश्च यावन्तो निर्देशा: प्राप्तास्ते सर्वे निरूपिताश्चर्चिताश्च।

**(४) चतुर्थे**–भोजव्याकरणस्य विशदं साङ्गोपाङ्गमध्ययनम्- इति अध्याये महोपाध्याय - श्रीविनयसागरसूरिविरचितस्य भोजव्याकरणस्याऽऽमूलचूलमध्ययनं निरूपितं वर्तते। तत्र वृत्तित्रयस्य सर्वाणि प्रकरणानि सविहङ्गावलोकनं साररूपेण स्थापितानि।

**(५) पञ्चमे**– पाणिनीयभोजव्याकरणयो : तुलनात्मकमध्ययनम् - इति अध्याये भोजव्याकरणग्रन्थे पाणिनीयव्याकरणस्य स्पष्टोल्लेखान्, सूचितोल्लेखान्, तद्व्याकरणपरम्पराया ग्रन्थेभ्यः प्राप्तोल्लेखान् विशदतया समाविश्य तुलनं कृत्वा इदं निरणायि -

''पाणिनीयव्याकरणस्य सर्वजनदुरूहत्वात् तदध्ययनप्रारंभे संस्कृतव्याकरणपरिचायक-ग्रन्थस्योपादेयताऽनेन भोजव्याकरणग्रन्थेन सम्पूर्णतया साधिता''। इति।

**(६) षष्ठे** – भोजव्याकरणकाराणां महोपाध्याय -श्रीविनयसागरसूरीणां संस्कृतव्याकरणशास्त्रपरम्परायां योगदानम् - इति अध्याये महोपाध्याय - श्रीविनयसागरसूरिभिर्भोजव्याकरणग्रन्थं विरच्य पाणिनीय-सारस्वतव्याकरणपरम्पराद्वयस्य सुमेलनं कृत्वा नवीना व्याकरणशास्त्रपरिपाटी व्यरचि, यत्रोभयोर्व्याकरणशास्त्रपरम्परयोरनिवार्याऽऽवश्यकता दृढं स्थापिता, यया सुफलितमिदं यत् संस्कृतभाषाया: संस्कृतवाङ्मयस्य च सम्यग्ध्ययनमध्यापनं च कर्तुं प्रयस्यद्भि: प्रथमं भोजव्याकरणस्याऽध्ययनेन श्रीगणेशं कृत्वा पाणिनीयमते सज्जबुध्धीभूय पाणिनीयव्याकरणमधीत्यैव संस्कृतवाङ्मयदृढदुर्गे प्रवेश: कर्तव्य:।

अस्मिन्नध्याये महोपाध्याय -श्रीविनयसागरसूरीणां धर्माभिनिवेशो, धर्मसहिष्णुता, संकलनशैली संक्षेपकारिणी (सूत्रात्मिका) प्रतिभा, छन्द:प्रभुत्वं वैशद्यमित्यादयो विषया: सोदाहरणं चर्चिता:।

शोधनिबन्धस्याऽन्ते षट्सु परिशिष्टेषु महोपाध्याय -श्रीविनयसागरसूरिभि: सारस्वतसूत्रपाठस्य रचिता पद्यमालिका नाम विद्वच्चिन्तामणि:, यथाप्राप्तसारस्वतसूत्रपाठस्य संशोधित पाठ:, तुलनात्मकधातुसूची, तुलनात्मकशब्दसूची, प्रकाशितभोजव्याकरण-स्याऽवश्यकशुध्धय:, सन्दर्भग्रन्थसूची।

अथ च अगस्त १९९१ त: प्रारब्धस्याऽस्य शोधप्रबन्धस्य पूर्णाहुति प्रसङ्गे प्रथमं तावदहं मम पूज्यप्रथमानां -श्रीमतीनां शारदाबेनमहाभागानां, ततश्च प्रातर्वन्दनीयानां पितृचरणानां श्रीमतां रमाकान्तमहोदयानां समुपकारान् स्मारं स्मारं स्वं कृतकृत्यं मन्वानोऽहं, सर्वशास्त्रशिरोमणीनां शुक्लोपाह्वानां गौरीशङ्करात्मजानां श्रीमतां लक्ष्मीशङ्करगुरुचरणानामन्तेवासित्वं हृदयेन संभाव्य, वैयाकरणमूर्धन्यान् पाठकोपाह्वान् श्रीमतो जयनारायणान् मनोवचनकायेन प्रणम्य, न्यायालङ्कारव्याकरणवारिधीन् मिश्रावटङ्कान् श्रीशोभितमहाभागान् सर्वदा संस्मृत्य, तानेतांश्च सर्वान्

अस्मिन् क्षणे हृदयेन पूजयित्वा हृदयोर्मिनियमने स्वमक्षमः मन्ये ।

अत्राऽस्मिन् प्रसङ्गे शुभचिन्तकानां शुक्लकुलोत्पन्नानां हरिशङ्करात्मजानां प्राचार्यपदं विभागाध्यक्षपदं चालङ्कुर्वाणानां श्रीमताम् उदयनमहाभागानां सततप्रेरणाध्यवसितचित्तानामुपकारान् स्मरामि ।

तथा च पाठकोपाह्वाः शङ्करप्रसादात्मजाः श्रीमन्तः अश्विनभाईमहोदयाः, प्राचार्यपदमलङ्कृतवन्तः शुक्लावटङ्काः चन्द्रशङ्करात्मजाः श्रीमन्तः निरंजनभाईमहोदयाः, मम गुरुचरणाः डोंगरेकुलोत्पन्नाः केशवात्मजाः श्रीमन्तः प्रभाकर महाभागाः इदानींतनाः प्राचार्यपदारूढाः पाण्डेयकुलावतंसाः हरिप्रसादमहाशयाः, पुरोहितकुलोत्पन्नाः जेठालालात्मजाः कनैयालालमहाभागाः अपि मम हृदये सन्मानस्थानं वहन्ति ।

मदीये शोधनिबन्धेऽस्मिन् राष्ट्रपतिसम्मानिता जानीकुलोत्पन्ना नटवरलालात्मजाः प्रो. डो. अरुणोदयमहोदया नैकवारं किं करणीयम् कथं करणीयम् इत्यादिप्रतिबोधं दत्तवन्तोऽतस्तेषामुपकारस्मरणमत्र विदधे ।

अस्य शोधनिबन्धस्य मार्गदर्शका जानीकुलोत्पन्नाः अरुणोदयात्मजाः श्रीमन्तो जयदेवमहाभागास्तु मां पदे पदे विना विलम्बेन सहोपवेशनेन च स्वकीयमधिकारं सुचारुतया निदर्शितवन्तः ।

अस्य मदीय शोधनिबन्धस्य 'कम्प्युटर-टाइपसेटिंग'- कर्मणि सौहार्दपूर्णव्यवहारेण सह शीघ्रतया साहाय्यं प्रददानस्य श्रीमतां राकेश् शाह् महोदयानां भूरिभूरि धन्यवादान् व्याहरामि ।

अन्ते च, सुखे च दुःखे च समानतया मदीया सहधर्मचारिणी मां च नित्यं कान्तासम्मिततयेति समुपदिशन्ती अ.सौ. राजेश्वरी अस्य शोधनिबन्धस्य पूर्णतायां सन्ततं प्रेरणावलंबनेन प्रायतत । इत्यलं विस्तरेण ।

वटोदरम् । वैद्यकुलोत्पन्नो रमाकान्तपुत्रः किशोरशर्मा ।

दिनाङ्कः : __-०६-१९९९ ।